रिणी” नै० अवेत्यस्योपसर्गत्वे “इतीव धारामवधीर्य्यति नैषध० धात्ववयवत्वपक्षे तु अवधीरयित्वेति भेदः ।

**अवधीरणा** स्त्री अवधीर—भावे युच् । १अवज्ञायां २तिरस्कारे च “कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि” रघुः “अयं स यस्मात् प्रणयावधीरणामशङ्कनीयां करभोरु ! मन्यसे” शकु० । भावे ल्युट् । तत्रार्थे न० ।

**अवधीरित** त्रि० अवधीर—कर्मणि क्त । १अवज्ञाते २तिरस्कृते च

**अवधूत** त्रि० अव+धू—क्त । १कम्पिते “पवनावधूतवसनान्तयैकया” माघः “विदधेऽवधूतसुरसद्मसम्पदम्” माघः । कृष्णयजुर्वेदान्तर्गते २उपनिषद्भेदे । ३अभिभूते, ४निवर्त्तिते, “अवधूतं रक्षो अवधूता अरातयः” शत०ब्रा० ५अनादृते च । “यो विलङ्घ्याश्रमान् वर्णान् आत्मन्येव स्थितः पुमान् । अतिवर्णाश्रमी योगी अवधूतः स उच्यते” इत्युक्तलक्षणे वर्णाश्रमधर्मत्यागिनि ६सन्न्यासिनि पु० । “अक्षरत्वात् वरेण्यत्वात् धूतसंसारबन्धनात् । तत्त्वमस्यर्थसिद्धत्वादवधूतोऽभिधीयते । यथा रविः सर्वरसान् प्रभुङ्क्ते हुताशनश्चापि हि सर्वभक्षकः । तथैव योगी विषयान् प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्धः” इति च तन्निरुक्तिलक्षणे एवमवधूतगीतशब्दे तल्लक्षणं दृश्यम् ।

**अवधूतगीत** न० ३त० । भागवते ११ स्क० भगवदुद्धवसंवादे यदुन्नृपं प्रति कस्यचिदवधूतस्य उपदेशभेदे । यथा “अत्राप्युदाहरन्तीममितिहासं पुरातनम् । अवधूतस्य संवादं यदोरमिततेजसः । अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम् । कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्म्मवित् । कुतो बुद्धिरियं ब्रह्मन्नकर्त्तुः सुविशारदा । यामासाद्य भवाल्लोकं विद्वांश्चरति बालवत् । प्रायोधर्मार्थकामेषु विवित्सायाञ्च मानवाः । हेतुनैव समीहन्ते आयुषा यशसा श्रिया । त्वन्तु कल्यः कविर्दक्षः सुभगोऽमितभाषणः । न कर्त्ता नेहसे कर्त्तुं जड़ोन्मत्तपिशाचवत् । जनेषु दह्यमानेषु कामलोभदवाग्निना । न तप्यसेऽग्निना मुक्तो गङ्गाम्भःस्थइव द्विपः । त्वं नः संपृच्छतां ब्रह्मन् ! आत्मन्यानन्दकारणम् । ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः” इति यदुन्नृपेण तल्लक्षणमुक्तम् । एवं यदुना पृष्टः स यदाह तदेव अवधूतगीतम् । तेन च “सन्ति मे बहवो राजन् ! गुरवो बुद्ध्युपाश्रिताः । यतो बुद्धिमुपादाय मुक्तोऽटामीह तान् शृणु । पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः । कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः । मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः । कुमारी शरकृत् सर्प ऊर्णनाभः सुपेशकृत् । एते मे गुरवो राजन् ! चतुर्विंशतिराश्रिताः । शिक्षावृत्तिभिरेतेषामन्वशिक्षमनुक्रमात्” इत्युपक्रम्य क्षित्यादिभ्यश्चतुर्विंशतेर्यथा यत् शिक्षितं तद्वर्णितम् तद्विस्तरस्तु ९ नवमाध्यायसमाप्तिपर्य्यन्ते तत्रैवानुसन्धेयः ।

**अवधूनन** न० अव+धू—णिच्—नुक् ल्युट् । १चालने । (झाड़ा) इति ख्याते व्यापारे “पादस्पर्शस्तु रक्षांसि दुष्कृतोऽनवधूननम्” मनुः । २चिकित्साभेदे च “तत्र तूर्णं गलापीड़ं कुर्य्याच्चाप्यवधूननम्” सुश्रु० । [ल्युट् । अवचूर्णने ।

**अवधूलन** न० धूलिं करोति अव+धूलि—कृत्यर्थे णिच्—भावे

**अवधृत** त्रि० अव+धृ—अन्तर्भूतण्यर्थः कर्म्मणि क्त । १अवधारिते निश्चिते “अनवधृताज्ञानसंशयविपर्यासस्तु यं कञ्चित् पुरुषं प्रति प्रवर्त्तमानः” इति सा०कौ० । २कृतनियमे ३विषयविशेषे व्यवस्थापिते ४स्थापिते च ।

**अवधृष्य** त्रि० अव+धृष—कर्म्मणि क्यप् । १अवधर्षणीये २तिरस्कार्य्ये । ३निश्चयेनावधार्य्ये “नियतं यत्त्तं रजसं मत्योऽनवधृष्यम्” श्रुतिः “अनवधृष्योहि भवत्यनवधृष्यः” शत०ब्रा० । ५पराभवनीये च । अव+धृष—ल्यप् । ६धर्षित्वेत्यर्थे अव्य० ।

**अवधेय** त्रि० अव+धा—यत् । १निवेश्ये २स्थापनीये यत्र चित्ताभिनिवेशः क्रियते तस्मिन् ३ग्राह्ये ये “प्रतिपित्सितमर्थं प्रतिपादयन् प्रतिपादयिताऽवधेयवचनो भवति” ‘अनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत” इति च सा०कौ० । ४ज्ञेये च । भावे यत् । ५अवधाने न० ।

**अव(ब)भ्र** त्रि० अव+भृ—मूलविभु०क बध—रक् न०त० वा । अहिंसके । “अव(ब)भ्र-ज्योतिरदितेर्ऋतावृधः” ऋ० ७,८२,१०, “अव(ब)भ्रमहिंसकम्” भा० ।

**अवध्वंस** पु० अव+ध्वन्स—घञ् । १परित्यागे, २चूर्णिते, ३निन्दायाञ्च “अवध्वंसइवारुणः” अथ० ५,२२,३ ।

**अवध्वस्त** त्रि० अव+ध्वन्स—क्त । १नष्टे २निन्दिते ३अवचूर्णिते ४त्यक्ते च ।

**अवन** न० अव+ल्युट् । १प्रीणने, २रक्षणे, ३प्रीतौ च “समनिन्दानवनाशं जनतालिकुलं यथैव दानवनाशम्” नलोद० ।

**अवनत** त्रि० अव+नम—क्त । १अधोभूते २आनते च । ‘अवनतशितिकण्ठकण्ठलक्ष्मीम्” माघः । “चतुरर्थ्यां कृशाश्वा० छण् आवनतीयः, अवनतसन्निकृष्टदेशादौ त्रि० ।

**अवनति** स्त्री अव+नम—क्तिन् । औद्धत्याभावे, १विनये, २अधोनमने च । “धनुषामवनतिः” कादम्बरी । ३प्रणामे च ।

**अवनद्ध** त्रि० अव+नह—क्त । १खचिते, २रोपिते ३वेष्टिते ४बद्धे च “चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः”